॥ श्रीगुरुभ्यो नमः ॥
॥ ॐ श्रीमहागणाधिपतये नमः ॥
॥ श्रीमच्चरणवैभवायै नमः ॥

# ॥ श्रीयोगीश्वर-याज्ञवल्क्य-मङ्गलाशासनम् ॥

ब्रह्मरात-महायोगि-बृहत्-सुकृत-मूर्तये ।
सुनन्दा-सुतरत्नाय-सानन्दायास्तु-मङ्गलम् ॥ (१)

जननी-जठर-प्राप्त-जलजाक्ष-दयोदयः ।
योऽभूत् परात्मवेत्तास्मै याज्ञवल्क्याय मङ्गलम् ॥ (२)

कृपागुरुर्गुरुर्यस्य ह्यकरोदुपनायनम् ।
वृद्धव्यास-प्रसादात्त-वैदुष्यायास्तु मङ्गलम् ॥ (३)

वैशम्पायन-संप्राप्त-वृजिनच्छेद-शक्तये ।
वैदेह-वसुधानाथ-वन्दनीयाय मङ्गलम् ॥ (४)

मैथिलास्थ-नगस्थूणा-मञ्जुपल्लव-कारिणः ।
मन्त्राक्षताः बभुर्यस्य माननीयाय मङ्गलम् ॥ (५)

वैशम्पायनतोऽधीतं ववाम यजुरुज्ज्वलम् ।
यस्सभायां तपोभाजां  योगिवर्याय मङ्गलम् ॥ (६)

स्वशक्ति-ख्यापनोद्युक्त-सप्तसैन्धवशासनात्  ।
आहर्त्रे बडवाश्वानां अर्कशिष्याय मङ्गलम् ॥ (७)

अयातयाम-माम्नायं आम्नायवपुषो हरेः ।
अध्यैष्ट यो मुनिस्तस्मा अक्षय्यं भूरि मङ्गलम् ॥ (८)

यस्य चित्ररथः शिष्यो योगिनेतुःप्रसादतः।
कात्यायनीप्रियायास्मै  कृपासाराय मङ्गलम् ॥ (९)

मिथिलाधिपदत्ताग्र-मानताय महात्मने ।
आहर्त्रे सौरभेयीनां  अध्वरान्तेस्तु मङ्गलम् ॥ (१०)

पितामहमनःपुत्रीपरिणेत्रे  पटीयसे ।
शान्तोद्दालकगर्वाय शान्तिसाराय मङ्गलम् ॥ (११)

दर्भ-स्तम्भ-हृत-ग्रीव-दृप्त-शाकल्य-जीवनम् ।
चकार यः प्रभावेन चित्रचर्याय मङ्गलम् ॥ (१२)

इति माङ्गलिकैः श्लोकैः
उपनदतः कण्वमुख्यसच्छिष्यान् ।
अनुगृह्णन् शुक्लयजुः –
शाखाचार्यो  मुनीश्वरो जयति ॥ (१३)

============சுபம்================